# केरलपाठावलिः

# संस्कृतम्

## पञ्चमी कक्ष्या

### द्वितीयो भागः

संस्कृतविद्यालयानां कृते

## KERALA READER - SANSKRIT

**Standard V**

**Part - II**

**For Sanskrit Schools only**

Government of Kerala
Department of Education

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद् - केरलाः

STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING - KERALA

2016

KT 463-1/Sanskrit - 5 (O/S)

# राष्ट्रगीतम्

जनगण मन अधिनायक जय हे,
भारत भाग्यविधाता।
पंजाब सिंध गुजरात मराठा,
द्राविड़ उत्कल बंगा।
विंध्य हिमाचल यमुना गंगा,
उच्छलजलधि तरंगा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे,
गाहे तव जय-गाथा।
जनगण मंगलदायक जय हे,
भारत भाग्यविधाता।
जय हे जय हे जय हे
जय जय जय जय हे।

# प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

State Council of Educational Research & Training (SCERT)
Poojappura, Thiruvananthapuram -12, Kerala.
E-mail:scertkerala@gmail.com

First Edition : 2014, Reprint : 2016

*Type setting by:* SCERT Computer Lab.

© Government of Kerala, Education Department
2016

# भूमिका।

आधुनिकविद्याभ्यासप्रक्रियासु नूतनाशयानां सन्निवेशः प्रकटो दृश्यते। शिशोः समग्रं विकासं (शारीरिकं, मानसिकं, बौद्धिकं) लक्ष्यीकृत्यैव एषामाशयानां प्रवृत्तिः प्रचलति। अत एव पाठ्यपुस्तकरचनायां विद्याशास्त्रिणः केरलराज्यशासकाश्च अवहिताः भवन्ति।

अधीतिः, बोधः, आचरणं, प्रचारणं चेति चतुर्धा विभक्ता विद्याभ्यासप्रक्रिया। एतत्फलप्राप्तये कालानुकूलं परिष्करणमपि आवश्यकम् अस्ति। शिशुमनःशास्त्रम् अनुसृत्यैव पाठ्यपुस्तकरचना कृता। तदर्थम् उपयोगिनी भवति परिष्कृता पाठ्यपद्धतिः। भारत देशीयपाठ्यपद्धतीः मूल्यनिर्णयोपाधींश्च उपजीव्यैव निर्मितमिदं पाठ्यपुस्तकम्।

प्रथमं पाठभागः, तदनु पठनप्रवर्तनानि, ततः अनुबन्धश्चेति क्रम एव सर्वेषु पाठेषु स्वीकृतः। कथापूरणं, गानालपनम्, अभिनयः इत्यादीनि शिशुकेन्द्रीकृतानि मानसिकविकासोल्लासप्रदानि, पठनप्रवर्तनानि अत्र समायोजितानि विद्यन्ते। संस्कृतपठनं प्रथमकक्ष्यातः एव आरभ्यते। कैरल्यां प्रचुरतया प्रचरितानि संस्कृतपदानि एव अस्मिन् पुस्तके अधिकतया प्रयुक्तानि। एवं च संस्कृतभाषां प्रति छात्रेषु आभिमुख्यं जनयितुं कथाः, अमरकोशः, सुभाषितानि च अत्र आयोजितानि सन्ति। सरलया रीत्या भाषाप्रयोगसामर्थ्यं सम्पादयितुम् अनेन छात्राः निपुणाः भवेयुः।

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषदः नेतृत्वे, अध्यापकानाम्, विद्याभ्यासविचक्षणानां च कठिनपरिश्रमस्य फलमेवेदं पाठ्यपुस्तकम्।

पठनोपकरणेष्वन्यतमम् एतत् पुस्तकं विद्यार्थिनां स्वयंपठनाय सहायकं भवति। नूतनमिदं पाठ्यपुस्तकं विद्याकुतुकिनां हस्तेषु समर्पयन्नहं नितरां निर्वृतिमनुभवामि।

पाठ्यपुस्तकमिदं लक्ष्यसाधकं कर्तुं भवदीयानामपि निर्देशान् सादरं प्रार्थये।

भवदीयः

**डा॰ पि ए फात्तिमा**

अनन्तपुरी

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः।

## TEXT BOOK DEVELOPMENT COMMITTE

## SANSKRIT ORIENTAL STANDARD V

### Participants

**Deepa kumari D.S** (HSA Sanskrit, A.S H.S.S Parippally, Kollam
**Lekha K** H.S.A Sanskrit S.N.V S.H.S , Thrikkaruva, Kollam
**Rajalekshmi Pillai. S** H.S.A Sanskrit , H.S For Boys Thevalakkara, Kollam
**C.P. Sanal Chandran** H.S.A Sanskrit, Mattannur H.S.S, Kannur
**Sindhu. T** H.S.A Sanskrit, S.N.D.P Sanskrit H.S Vallikunnam, Alappuzha

### Artists

**Rajeevan Parayil**, H.S. Azhikkode, Kannur
**Varghese Kalathil**, GHSS, Pallikkunnu, Kannur

### Experts

**Dr. P. Laila**, Principal (Rtd.) Govt. Sanskrit College ,Thiruvananthapuram
**Dr. S. Remadevi Amma** , Associate Professor, Dept of General Sanskrit, S.S.U.S, Kalady, Ernakulam
**Dr. T.D. Suneethi Devi**, Spl. Officer Sanskrit DPI

### Advisor

**Prof.R.Vasudevan Potti**, Prof.(Retd)
**Sivadhamam**, Sreekandeswaram, Thiruvananthapuram

### Academic Co - Ordinator

**Dr. Kerala Sreemathi**.T, Research Officer (Sanskrit)
SCERT, Poojappura, Thiruvananthapuram.

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद् - केरलाः
STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING - KERALA

# विषयानुक्रमणिका।


| | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|
| १. | अतिलोभो अनर्थाय | चित्रकथा। | 6 - 14 |
| २. | सुभाषितानि | सुभाषितानि। | 15 - 20 |
| ३. | पितृपरिपालनम्। | सम्भाषणम्। | 21 - 29 |
| ४. | अमरकोशः। | कारिका। | 30 - 34 |
| ५. | दानवीरः कर्णः। | कथा। | 35 - 40 |


KT 463-2/Sanskrit - 5 (O/S)

## प्रथमः पाठः


# अतिलोभः अनर्थाय

*(पञ्चतन्त्रात् उद्धृतां काञ्चित् कथां पठामः।)*






कस्मिंश्चित् ग्रामे कश्चन कृषकः आसीत्।



कालान्तरे अनावृष्ट्या कृषिनाशः अभवत्। कर्षकः दरिद्रो जातः।

एकदा सः समीपे विद्यमानस्य वल्मीकस्य उपरि स्थितं कमपि सर्पम् अपश्यत्। एवम् अचिन्तयत् च।


एषःमम क्षेत्रपालः, क्षीरमानीय ददामि।



सन्तुष्टः सर्पः प्रतिदिनम् एकैकं सुवर्णनाणकं पात्रे अर्पयति स्म।

एकदा सः कृषकः पयोदानाय पुत्रं नियुज्य देशान्तरम् अगच्छत्।


पितुः निर्देशं पालयन् सः पुत्रः पात्रे अर्पितं सुवर्णनाणकम् अपश्यत्। वल्मीके बहूनि नाणकानि भविष्यन्ति। अद्यैव तानि सर्वाण्यपि स्वीकरिष्यामि इति मन्वानः सः सर्पं हन्तुं दण्डेन अताडयत्।





कुपितः सर्पः बालं दशति स्म। अत्याग्रही सः बालः मृतश्च।

"अतिलोभोऽनर्थाय।"




पुत्रनाशेन दुखितोऽपि कर्षकः सर्पं प्रति क्षमां याचितवान्।

## पदच्छेदः

| | | |
|---|---|---|
| अतिलोभोऽनर्थाय | - | अतिलोभः + अनर्थाय |
| दरिद्रोऽभवत् | - | दरिद्रः + अभवत्। |
| अद्यैव | - | अद्य + एव। |
| तद्दृष्ट्वा | - | तत् + दृष्ट्वा। |
| सन्तीति | - | सन्ति + इति। |
| मृतश्च | - | मृतः + च। |

## क्रियापदपरिचयः

| | | |
|---|---|---|
| आसीत् | - | अस भुवि परस्मैपदी लङ् प्र. पु. ए. व.। |
| अभवत् | - | भू सत्तायाम् परस्मैपदी लङ् प्र. पु. ए. व.। |
| अर्पयति | - | ऋगतौ - णिचि - पुगागमे - परस्मैपदी - लट्. प्र. पु. ए. व.। |
| दशति | - | दंश् दशने परस्मैपदी लट् प्र. पु. ए. व.। |
| अताडयत् | - | ताड सम्प्रहारे चुरादि - परस्मैपदी - लङ् - प्र. पु. ए. व.। |

## पठनप्रवर्तनानि।

❖ पाठभागस्थानि चित्राणि दृष्ट्वा कथांशान् वदतु।

**श्रद्धेयाः अंशाः।**

- चित्रदर्शनम्, अपग्रथनम्।
- आशयग्रहणम्।
- चित्रानुसारं कथायाः कथनम्।

❖ अधोदत्तस्य पदस्य अर्थं शब्दकोशात् उद्धृत्य लिखतु।

क्षीरम्, अन्तिके, विनाशः, सज्जः, मारयितुं, पश्यति स्म, नाकुः

**श्रद्धेयाः अंशाः।**

- अर्थावबोधः।
- आशयग्रहणम्।
- विवेचनसामर्थ्यम्।

❖ कोष्ठके दत्तानि वर्तमानकाल - भूतकाल - क्रियापदानि विविच्य पट्टिकायां लिखतु।
(ददामि, आसीत्, दशति, अपश्यत्, अभवत्, अर्पयति।)

| वर्तमानकालः (लट्) | भूतकालः (लङ्) |
|---|---|
| | |

**श्रद्धेयाः अंशाः।**

- अर्थग्रहणम्।
- विवेचनम्।
- पट्टिकाकरणम्।

❖ चित्रकथां कथाकथनरूपेण अवतारयतु।

**श्रद्धेयाः अंशाः।**

- आशयग्रहणम्।
- अक्षरस्फुटता।
- कथायाः पूर्णता।
- पौर्वापर्यक्रमः।

❖ पाठं पठित्वा चित्रानुसारं कोष्ठात् पदानि स्वीकृत्य कथां लिखतु।

(कर्षकः, सर्पः, क्षीरम्, सुवर्णनाणकं, दशति, बालः)

कश्चन  कृषिविनाशकारणं चिन्तयन् उपविशति। तदानीं सः वल्मीकस्य उपरि  पश्यति।  क्षेत्रपालः भवति इति सः चिन्तयति।  आनीय ददाति। सन्तुष्टः  प्रतिदिनम् एकैकं  पात्रे अर्पयति। एकदा  पयोदानाय पुत्रं नियुज्य देशान्तरं गच्छति। क्षीरपानानन्तरं सर्पः  स्थापयति। तद्दृष्ट्वा सः  सर्पस्य वासस्थाने वल्मीके बहूनि सुवर्णनाणकानि सन्ति इति चिन्तयति। सः  सर्पं हन्तुं निश्चिनोति। सर्पः बालं दशति। बालः मरणं प्राप्नोति।

**श्रद्धेयाः अंशाः।**

आशयग्रहणम्।

कथायाः पूर्णता।

विभक्त्यनुसारम् उचितपदचयनम्।

❖ अनुबन्धं पठित्वा अधोदत्तानां पदानां धातु - पद - लकार - पुरुष- वचनानि पूरयत।

| पदम् | धातुपदलकारपुरुषवचनानि |
|---|---|
| दशति | |
| अर्पयति | |
| दशसि | |
| अर्पयन्ति | |
| दशथः | |

**श्रद्धेयाः अंशाः।**

पदार्थज्ञानम्।

आशयग्रहणम्।

धातुपदलकार -पुरुष- वचन -ज्ञानम्।

## अनुबन्धः

### शब्दकोशः

| पदम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलम् |
|---|---|---|---|---|
| कश्चन | कश्चित् | ഒരു | ಒಬ್ಬ | a |
| कालान्तरे | अन्यस्मिन् काले | മറ്റൊരുകാലത്ത് | ಕಾಲಾಂತರದಲ್ಲಿ | afterwards/in due course of time |
| कृषिनाशः | कृषिविनाशः | കൃഷിക്കെടുതി | ಕೃಷಿಯನಾಶ | agricultural disaster |

| | | | | |
|---|---|---|---|---|
| एकदा | एकस्मिन् अवसरे | ഒരിക്കൽ | ಒಮ್ಮೆ | once |
| समीपे | अन्तिके | അരികിൽ | ಹತ್ತಿರದಲ್ಲಿ | near |
| वल्मीकम् | नाकुः | മൺപുറ്റ് | ಹುತ್ತ | termitary |
| उपरि | ऊर्ध्वं | മുകളിൽ | ಮೇಲೆ | above |
| सन्तुष्टः | तुष्टः | സന്തുഷ്ടൻ | ಸಂತೃಪ್ತನು | one who is pleased |
| क्षेत्रपालः | क्षेत्ररक्षकः | വയലിനെ സംരക്ഷിക്കുന്നവൻ | ಕ್ಷೇತ್ರಪಾಲಕನು | Protector of paddyfields |
| प्रतिदिनम् | दिने दिने | ദിവസേന | ಪ್ರತಿದಿನವೂ | daily/day to day |
| पयः | क्षीरम् | പാൽ | ಹಾಲು | milk |
| नियुज्य | नियोगं कृत्वा | നിയോഗിച്ചിട്ട് | ನಿಯೋಜಿಸಿ | having appointed |
| देशान्तरम् | अन्यः देशः | മറ്റൊരുദേശം | ಬೇರೆ ದೇಶವನ್ನು | another place |
| अपश्यत् | पश्यति स्म | കണ്ടു | ನೋಡಿದನು | saw |
| हन्तुम् | मारयितुम् | കൊല്ലുന്നതിന് | ಕೊಲ್ಲಲು | to kill |
| उद्युक्तः | सज्जः | തയ്യാറായി | ತಯಾರಾದನು | ready to do |
| दशति | दंशनं करोति | കടിക്കുന്നു | ಕಚ್ಚುತ್ತದೆ | bites |
| मृतः | मृत्युमुपगतः | മരിച്ചവൻ | ಸತ್ತನು | dead |
| अतिलोभः | अत्याग्रहः | അത്യാഗ്രഹം | ಅತ್ಯಾಸೆ | greed |
| अनर्थः | नाशः | നാശം | ವಿನಾಶ | ruin |

## धातुरूपाणि

### दंश् दशने लट् परस्मैपदी ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | दशति | दशतः | दशन्ति |
| म. पु. | दशसि | दशथः | दशथ |
| उ. पु. | दशामि | दशावः | दशामः । |

## ऋ गतौ णिचि पुग् लट् परस्मैपदी।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | अर्पयति | अर्पयतः | अर्पयन्ति |
| म. पु. | अर्पयसि | अर्पयथः | अर्पयथ |
| उ. पु. | अर्पयामि | अर्पयावः | अर्पयामः। |

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| 1. | चित्रं दृष्ट्वा कथांशःकथितः। | | | | |
| 2. | समानपदचयनं कृतम्। | | | | |
| 3. | लट् - लङ् पट्टिका कृता। | | | | |
| 4. | कथाकथनरूपेण अवतारितम्। | | | | |
| 5. | कथावतारिता। | | | | |
| 6. | चित्रानुसारं कथा पूरिता। | | | | |
| 7. | पदानां पुरुषवचनानि-लिखितानि। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*

# द्वितीयः पाठः
# सुभाषितानि

(सुष्ठु - शोभनं भाषितं सुभाषितम्। सुभाषितपठने भवन्तः उत्सुकाः खलु? पाठेऽस्मिन् शीलं, दानं, विद्यार्थिलक्षणं बुद्धिः इत्येतान् विषयान् अधिकृत्य सुभाषितानि पठामः।)

## शीलम्

1. **काकः कृष्णः पिकः कृष्णः**
**को भेदः पिककाकयोः।**
**वसन्तकाले संप्राप्ते**
**काकः काकः पिकः पिकः।।**

**अन्वयः** - काकः कृष्णः। पिकः कृष्णः। पिककाकयोः कः भेदः ? वसन्तकाले संप्राप्ते काकः काकः, पिकः पिकः।

**आशयः** - काकः पिकःच कृष्णवर्णौ एव। तयोः रूपे भेदः नास्ति। यदा वसन्तकालः आगच्छति तदा पिकः मधुरं गायति। काकः का का इति रटति। एवं लोके रूपेण सदृशा अपि जनाः कर्मणा वचसा च विविच्य ज्ञायन्ते।

### पदार्थाः

| पदम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलम् |
|---|---|---|---|---|
| कृष्णः | कृष्णवर्णः | കറുപ്പുനിറം | ಕಪ್ಪುಬಣ್ಣ | black colour |
| भेदः | अन्तरम् | വ്യത്യാസം | ವ್ಯತ್ಯಾಸ | difference |
| पिकः | कोकिलः | കുയിൽ | ಕೋಗಿಲೆ | cuckoo |

### पदच्छेदः

को भेदः - कः + भेदः

## दानम्

2. **येषां न विद्या न तपो न दानम्**
**ज्ञानं न शीलं न गुणो न धर्मः।**
**ते मर्त्यलोके भुवि भारभूताः**
**मनुष्यरूपेण मृगाश्चरन्ति।।**

**अन्वयः** - येषां विद्या न, तपः न, दानं न, ज्ञानं न, शीलं न, गुणः न, धर्मः न, ते मृगाः। भुवि भारभूताः ते मर्त्यलोके मनुष्यरूपेण चरन्ति।

**आशयः** - येषां जनानां विद्या, तपः, शीलं, ज्ञानं, दानं, धर्मः च न सन्ति ते पशुसमानाः। ते भूमेः भारभूताः अस्मिन् लोके मनुष्यरूपेण सञ्चरन्तः मृगाः भवन्ति।

### पदार्थाः

| पदम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलम् |
|---|---|---|---|---|
| मर्त्यलोकः | मानवलोकः | മനുഷ്യലോകം | ಭೂಲೋಕ | earth |
| भारभूताः | भारत्वेन परिणताः | ഭാരമായി തീർന്നവൻ | ಭಾರವಾದವರು | being a burden |

### पदच्छेदः

तपो न - तपः + न।
गुणो न - गुणः + न
मृगाश्चरन्ति - मृगाः + चरन्ति।

## विद्यार्थिलक्षणम्

3. **काकदृष्टिर्बकध्यानं श्वाननिद्रा तथैव च।**
**अल्पाहारो जीर्णवस्त्रमेतद् विद्यार्थिलक्षणम्।।**

**अन्वयः** - काकदृष्टिः, बकध्यानं, श्वाननिद्रा, अल्पाहारः तथैव च जीर्णवस्त्रम् एतत् विद्यार्थिलक्षणम्।

**आशयः** - काकस्य इव सूक्ष्मं दर्शनं (श्रद्धा) बकस्य इव ध्यानम् (एकाग्रता) श्वानस्य इव निद्रा (सहसा जागरणशीलं) च विद्यार्थिनां शीलं भवेत्। किं च सः मिताहारी ललितवस्त्रधारी च स्यात्। एतदेव विद्यार्थिनां लक्षणं भवति।

### पदार्थाः

| पदम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलम् |
| --- | --- | --- | --- | --- |
| श्वानः | शुनकः | നായ | ನಾಯಿ | dog |
| अल्पाहारः | मिताहारः | മിതാഹാരം | ಮಿತಾಹಾರ | moderate food |

### पदच्छेदः

काकदृष्टिर्बकध्यानम् - काकदृष्टिः + बकध्यानम्
तथैव - तथा + एव।

**4. बुद्धिर्यस्य बलं तस्य**
**निर्बुद्धेस्तु कुतो बलम्।**
**वने सिंहो मदोन्मत्तः**
**शशकेन निपातितः।।**

**अन्वयः** - यस्य बुद्धिः तस्य बलम्। निर्बुद्धेः तु बलं कुतः? वने मदोन्मत्तः सिंहः शशकेन निपातितः।।

**आशयः** - यस्य बुद्धिः अस्ति तस्यैव बलमपि अस्ति। बुद्धिरहितस्य बलं नास्त्येव। सिंहः मृगराजः भवति। तथापि अहङ्कारेण बुद्धिरहितः अभवत्। अतः एकः शशकः तं सिंहं कूपे अपातयत्।

### पदार्थाः

| | | | | |
| --- | --- | --- | --- | --- |
| शशकः | शशः | മുയൽ | ಮೊಲ | rabbit |
| निर्बुद्धिः | बुद्धिरहितः | ബുദ്ധിയില്ലാത്തവൻ | ಬುದ್ಧಿರಹಿತನು | foolish |

### पदच्छेदः

निर्बुद्धेस्तु - निर्बुद्धेः + तु।
कुतो बलम् - कुतः + बलम्।
बुद्धिर्यस्य - बुद्धिः + यस्य।
सिंहो मदोन्मत्तः - सिंहः + मदोन्मत्तः।

## पठनप्रवर्तनानि।

❖ सुभाषितानि तालानुसारम् आलपतु।

**श्रद्धेयाः अंशाः।**

- उचिततालः।
- अक्षरस्फुटता।
- आशयावधारणम्।

❖ अधोनिर्दिष्टानां पदानाम् अर्थान् शब्दकोशस्य साहाय्येन लिखतु।
(शशकः, निर्बुद्धिः, पिकः, शुनकः, मर्त्यलोकः, अल्पाहारः)

**श्रद्धेयाः अंशाः।**

- शब्दकोशनिरीक्षणम्।
- अवधारणम्।
- लेखनम्।

❖ पाठभागे दत्तानां सुभाषितानाम् आशयं लिखतु।

**श्रद्धेयाः अंशाः।**

- सुभाषितपठनम्।
- आशयावगमः।
- क्रमीकृत्य लेखनम्।

❖ अधो दत्तयोः चित्रयोः आशयप्रतिपादके सुभाषिते चित्वा लिखतु।









**श्रद्धेयाः अंशाः।**

- चित्रविशकलनम्।
- समीचीनाशयप्रतिपादकयोः सुभाषितयोः चयनम्।
- लेखनम्।

## अनुबन्धः।

### भू सत्तायां परस्मैपदी लट्।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | भवति | भवतः | भवन्ति |
| म. पु. | भवसि | भवथः | भवथ |
| उ. पु. | भवामि | भवावः | भवामः। |

एवम् - चर् धातोः रूपाणि लिखतु।

## अमरकोशः

**मनुष्यवर्गः** मनुष्या मानुषा मर्त्या मनुजा मानवा नराः।
स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः।।

**बुद्धिः** बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः।
प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः।।

**सिंहः** सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः।
कण्ठीरवो मृगरिपुर्मृगदृष्टिर्मृगादनः।।

## किमधिगतम् ?

❖ पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।


| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| 1. | सुभाषितानाम् आलपनं कृतम्। | | | | |
| 2. | पदानाम् अर्थलेखनं कृतम्। | | | | |
| 3. | आशयलेखनं कृतम्। | | | | |
| 4. | चित्रं दृष्ट्वा सुभाषितविवेचनं कृतम्। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*

# तृतीयः पाठः

# पितृपरिपालनम् ।



**(अध्यापिका कक्ष्यां प्रविशति)**

छात्राः : (उत्थाय) नमो गुरुभ्यः ।

अध्यापिका : स्वस्त्यस्तु, उपविशन्तु। (कक्ष्यां निरीक्ष्य) दिनेशं न पश्यामि, सः कुत्र अस्ति?

जोण : : सः पितामहस्य समीपे अस्ति।

अध्यापिका : सः तत्र किं करोति?

सुनिता : सः पितामहस्य परिचरणे निरतः।

अध्यापिका : किमापन्नं पितामहस्य?

सूरजः : पितामहस्य एकः अपघातोऽभवत्।



अध्यापिका : अपघातो वा? कदा?

विनयः : विद्यालयागमनावसरे।

अध्यापिका : कथम्?

निसारः : पितामहेन साकं विद्यालयम् आगच्छन्तः अभवाम। तदवसरे द्विचक्रिकया आगतेन केनचित् उन्मत्तेन युवकेन पितामहः पातितः।

जोण : : वयं पितामहम् आतुरालयम् अनयाम। दिनेशः तत्र स्थित्वा परिचरणं करोति।

अध्यापिका : सम्यक् कृतम्। पितॄणां सेवा अस्माकं कर्तव्या।

**अभिवादनशीलस्य**

**नित्यं वृद्धोपसेविनः।**

**चत्वारि तस्य वर्धन्ते**

**आयुर्विद्या यशो बलम्।।**

**आशयः** - *यः पुरुषः नित्यं मान्यान् मानयति, वृद्धजनान् परिपालयति च, तस्य आयुः, विद्या, यशः, बलं चेति चत्वारि वर्धन्ते।*

## पदच्छेदः

नमो गुरुभ्यः - नमः + गुरुभ्यः।

स्वस्त्यस्तु - स्वस्ति + अस्तु।

अपघातोऽभवत् - अपघातः + अभवत्।

चास्माकम् - च + अस्माकम्।

अपघातो वा - अपघातः + वा

यशो बलम् - यशः + बलम्।

आयुर्विद्या - आयुः + विद्या।

## क्रियापदपरिचयः

पश्यामि - दृशिर् प्रेक्षणे परस्मैपदी लट् उ. पु. ए. व.।

अस्ति - अस भुवि परस्मैपदी लट् प्र. पु. ए. व.।

करोति - डुकृञ् करणे परस्मैपदी लट् प्र. पु. ए. व.।

अभवाम - भू सत्तायाम् लङ् उ. पु. ब. व.।

अभवत् - भू सत्तायाम् लङ् प्र. पु. ए. व.।

अनयाम - णीञ् प्रापणे लङ् उ.पु, ब व।

## पठनप्रवर्तनानि।

❖ पात्राणां भागं स्वीकृत्य पाठ्यांशं कक्ष्यायाम् अवतारयतु।

**श्रद्धेयाः अंशाः।**

- प्रतिपाद्यांशावबोधः।
- काक्वनुसारं सम्भाषणम्।
- तन्मयीभावः।

❖ कोष्ठकात् उचितानि प्रश्नवाचकपदानि चित्वा सम्भाषणं पूरयतु।

(किम्, कदा, कुत्र, कथम्)

क. भवतः नाम .............?

मम नाम सुरेशः।



ख. भवान् ............. गच्छति ?

अहम् आपणं गच्छामि।

ग. भवान् ............. उत्तिष्ठति ?

अहं षड्वादने उत्तिष्ठामि।

घ. भवान् ............. विद्यालयं गच्छति ?

अहं द्विचक्रिकया विद्यालयं गच्छामि।



**श्रद्धेयाः अंशाः।**

- आशयावगतिः।
- प्रश्नवाचकानां विवेचनम्।
- सम्भाषणपूरणम्।

❖ बालप्रबोधनं पठित्वा कोष्ठकात् सुबन्तपदानि तिङन्तपदानि अव्ययपदानि च चित्वा पट्टिकायां निवेशयतु।

(पश्यामि, अस्ति, सः, करोति, परिचरति, अपघातः, कदा, कथम्, विद्यालयम्, अवसरे, युवकस्य, स्थित्वा)

**उदाः**

| सुबन्तपदानि | तिङन्तपदानि | अव्ययपदानि |
|---|---|---|
| सः | पश्यामि | कदा |
| | | |
| | | |
| | | |

**श्रद्धेयाः अंशाः।**

- अपग्रथनम्।
- विवेचनम्।
- पट्टिकायां निवेशनम्।

❖ अनुबन्धं पठित्वा अर्थनिर्देशपूर्वकं बालशब्दस्य सप्तसु विभक्तिषु एकवचनरूपाणि लिखत।

**श्रद्धेयाः अंशाः।**

- अकारान्तपुल्लिंगशब्दस्य रूपाणां ज्ञानम्।
- विभक्तिज्ञानं, वचनविवेचनम्।

# अनुबन्धः

## शब्दकोशः

| पदम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलम् |
|---|---|---|---|---|
| पश्यामि | अवलोकयामि | കാണുന്നു | ನೋಡುತ್ತೇನೆ | see |
| पितामहः | पितुः पिता | അപ്പൂപ്പൻ | ಅಜ್ಜ(ತಂದೆಯತಂದೆ) | grand father |
| अस्वस्थः | न स्वस्थः | അസ്വസ്ഥൻ | ಆರೋಗ್ಯವಿಲ್ಲದವನು | one who has uneasiness |
| आपन्नम् | संजातम् | ഉണ്ടായി | ಆಯಿತು | happened |
| अपघातः | दुर्घटना | അപകടം | ದುರ್ಘಟನೆ | accident |
| उन्मत्तः | प्रमत्तः | ഉന്മത്തൻ | ಮತ್ತೇರಿದವನು | an intoxicated man |
| आतुरालयम् | वैद्यशाला | ആശുപത്രി | ಆಸ್ಪತ್ರೆ | hospital |
| अनयाम | अहराम | കൊണ്ടുപോയി | ಪ್ರವೇಶಿಸಿದನು | have been taken |
| परिचरणम् | परिपालनम् | പരിചരണം | ಆರೈಕೆ | service |
| पातितः | पतनं कारितः | വീഴ്ത്തി | ಬೀಳಿಸಿದನು | endangered |

## शब्दरूपाणि

### अकारान्तः पुल्लिङ्गः 'बाल' शब्दः।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | बालः | बालौ | बालाः |
| सं. प्र. | हे बाल! | हे बालौ! | हे बालाः! |
| द्वि. | बालं | बालौ | बालान् |
| तृ. | बालेन | बालाभ्यां | बालैः |
| च. | बालाय | बालाभ्यां | बालेभ्यः |
| प. | बालात् | बालाभ्यां | बालेभ्यः |
| ष. | बालस्य | बालयोः | बालानाम् |
| स. | बाले | बालयोः | बालेषु। |

*एवं पितामहशब्दः।*

## दकारान्तः त्रिषु लिङ्गेषु समानः 'अस्मद्' शब्दः।

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्र. | अहं | आवां | वयं |
| द्वि. | मां, मा | आवां, नौ | अस्मान्, नः |
| तृ. | मया | आवाभ्यां | अस्माभिः |
| च. | मह्यं/मे | आवाभ्यां/नौ | अस्मभ्यम्/नः |
| प. | मत् | आवाभ्यां | अस्मत् |
| ष. | मम/मे | आवयोः/नौ | अस्माकं/नः |
| स. | मयि | आवयोः | अस्मासु। |

## 'डुकृञ्' करणे लट् वर्तमानकाले परस्मैपदी।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्र. पु. | करोति | कुरुतः | कुर्वन्ति |
| म. पु. | करोषि | कुरुथः | कुरुथ |
| उ. पु. | करोमि | कुर्वः | कुर्मः। |

## भू सत्तायां परस्मैपदी लङ्।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्र. पु. | अभवत् | अभवतां | अभवन् |
| म. पु. | अभवः | अभवतं | अभवत |
| उ. पु. | अभवम् | अभवाव | अभवाम। |

## ബാലപ്രബോധനം

വെള്ളം ജടാന്തേ ബിഭ്രാണം
വെള്ളിമാമല വിഗ്രഹം
വെള്ളൂരമർന്ന ഗൗരീശ-
മുള്ളിലൻപൊടു ചിന്തയേ
കർത്തൃകർമ്മക്രിയാഭേദം
വിഭക്ത്യർത്ഥാന്തരങ്ങളും
ഭാഷയായിഹ ചൊല്ലുന്നേൻ
ബാലന്മാരറിവാനഹം.
ശബ്ദം രണ്ടുവിധം പ്രോക്തം
തിങന്തം ച സുബന്തവും
രണ്ടുജാതി സുബന്തേ ചാ -
പ്യജന്തം ച ഹലന്തവും
ലിങ്ഗം മുമ്മൂന്നു രണ്ടിനും
വരും പുല്ലിംഗമാദിയിൽ
സ്ത്രീലിങ്ഗം മദ്ധ്യഭാഗേ സ്യാ-
ദൊടുക്കത്തു നപുംസകം.
പ്രഥമാ ച ദ്വിതീയാ ച
തൃതീയാ ച ചതുർത്ഥ്യപി
പഞ്ചമീ ഷഷ്ഠിയും സപ്ത-
മ്യേവമേഴു വിഭക്തികൾ.
ഇവറ്റിന്നിഹ വെവ്വേറെ
മുമ്മൂന്നു വചനം വരും.
ഏകദ്വിബഹുമുൻപായി
വചനം മൂന്നിഹ ക്രമാത്
ഒരുത്തനിരുവർ പിന്നെ
പലരെന്നർത്ഥമായ് വരും.
പ്രഥമായാ ഭേദമത്രേ
മുറ്റും സംബോധനാഭിധാ.
അതെന്നു പ്രഥമയ്ക്കർത്ഥം
ദ്വിതീയയ്ക്കതിനെ പുനഃ
അതിനോടതിലേക്കെന്നും

| | कर्ता | कर्म | क्रिया |
|---|---|---|---|
| *उदा* | बालः | ग्रामं | गच्छति। |

शब्दः
- तिङन्तः (पठति)
- सुबन्तः (रामः)
  - अजन्तः
  - हलन्तः

| | अजन्तः | हलन्तः |
|---|---|---|
| पुल्लिङ्गः | गजः | राजा |
| स्त्रीलिङ्गः | लता | वाक् |
| नपुंसकलिङ्गः | वनम् | मनः |

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | वृक्षः | वृक्षौ | वृक्षाः |
| सं प्र. | हे वृक्ष! | हे वृक्षौ! | हे वृक्षाः! |
| द्वि. | वृक्षम् | वृक्षौ | वृक्षान् |
| तृ. | वृक्षेण | वृक्षाभ्याम् | वृक्षैः |
| च. | वृक्षाय | वृक्षाभ्याम् | वृक्षेभ्यः |
| प. | वृक्षात् | वृक्षाभ्याम् | वृक्षेभ्यः |
| ष. | वृक्षस्य | वृक्षयोः | वृक्षाणाम् |
| स. | वृक्षे | वृक्षयोः | वृक्षेषु। |

ദ്വിതീയയ്ക്കർത്ഥമായ് വരും
തൃതീയാഹേതുവായിട്ടു
കൊണ്ടാലോടുടെയെന്നപി
ആയിക്കൊണ്ടു ചതുർത്ഥീ ച
സർവ്വത്ര പരികീർത്തിതാ
അതിൽ നിന്നതിനെക്കാളും
ഹേതുവായിട്ടു പഞ്ചമീ
ഇക്കുമിന്നുമുടെ ഷഷ്ഠി-
ക്കതിന്റെ വച്ചുമെന്നപി-
അതിങ്കലതിൽ വച്ചെന്നും
വിഷയം സപ്തമീ മതാ.

| | | |
|---|---|---|
| वृक्षः | - | വൃക്ഷം |
| हे वृक्ष! | - | അല്ലയോ വൃക്ഷമേ! |
| वृक्षम् | - | വൃക്ഷത്തെ, വൃക്ഷത്തോട്, വൃക്ഷത്തിലേക്ക് |
| वृक्षेण | - | വൃക്ഷത്താൽ, വൃക്ഷത്തെക്കൊണ്ട് |
| वृक्षाय | - | വൃക്ഷത്തിനായിക്കൊണ്ട് |
| वृक्षात् | - | വൃക്ഷത്തിൽ നിന്ന്, വൃക്ഷത്തെക്കാൾ |
| वृक्षस्य | - | വൃക്ഷത്തിന്റെ |
| वृक्षे | - | വൃക്ഷത്തിൽ, വൃക്ഷത്തിൽവെച്ച് |

❖ अव्ययानां त्रिषु लिङ्गेषु, त्रिषु वचनेषु, सर्वासु विभक्तिषु च एकमेव रूपं भवति। विकारो न जायते।

**अव्ययम्**

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।**

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓)करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| 1. | सम्भाषणावतारणं कृतम्। | | | | |
| 2. | सम्भाषणपूरणं कृतम्। | | | | |
| 3. | पट्टिकाकरणं कृतम्। | | | | |
| 4. | बालशब्दस्य एकवचन - रूपाणि लिखितानि। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*

## चतुर्थः पाठः

# अमरकोशः

(शब्दकोशेषु अमरकोशः प्रथमगणनीयः भवति। अस्य कोशस्य कर्ता अमरसिंहः। अमरकोशस्य नामान्तरं भवति नामलिङ्गानुशासनम्। अस्मिन् त्रयः काण्डाः सन्ति। अतः अस्य त्रिकाण्डी इत्यपि नाम अस्ति।)

**स्वर्गवर्गः** - **स्वरव्ययं स्वर्गनाकस्त्रिदिवस्त्रिदशालयाः।**
**सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम्।।**

**व्याख्यानम्** - स्वर् (अव्ययं), स्वर्गः, नाकः, त्रिदिवः, त्रिदशालयः, सुरलोकः (अ. पु.), द्यौः (ओ. स्त्री).दिव् (व. स्त्री), त्रिविष्टपम् (अ. न) एतानि स्वर्गस्य पर्यायपदानि।

**व्योमवर्गः** - **द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम्।**
**नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम्।।**

**व्याख्यानम्** - द्यौः (ओ. स्त्री.), दिव् (व. स्त्री.), अभ्रम् (अ. न), व्योमन् (न. न.), पुष्करम्, अम्बरम् (अ. न.), नभः (स. न.) अन्तरिक्षं, गगनम्, अनन्तम् (अ. न.), सुरवर्त्म (न. न.), खम् (अ. न) इत्यादीनि आकाशस्य पर्यायपदानि।

**धीवर्गः** - **बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः।**
**प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः।।**

**व्याख्यानम्** - बुद्धिः (इ. स्त्री.), मनीषा, धिषणा (आ. स्त्री.), धीः (ई. स्त्री.), प्रज्ञा (आ. स्त्री.), शेमुषी (ई. स्त्री.), मतिः (इ. स्त्री.), प्रेक्षा (आ. स्त्री.), उपलब्धिः (इ. स्त्री.), चित् (त. स्त्री.), संवित्, प्रतिपत् (त. स्त्री.), ज्ञप्तिः (इ. स्त्री.), चेतना (आ. स्त्री.) एतानि बुद्धेः पर्यायपदानि।

**भूवर्गः** - **भूर्भूमिरचलाऽनन्ता रसा विश्वम्भरा स्थिरा।**
**धरा धरित्री धरणिः क्षोणिर्ज्या काश्यपी क्षितिः।।**

**व्याख्यानम्** - भूः (ऊ. स्त्री.), भूमिः (इ. स्त्री.), अचला, अनन्ता, रसा, विश्वम्भरा, स्थिरा, धरा,(आ. स्त्री.) धरित्री (ई. स्त्री.), धरणिः, क्षोणिः (इ. स्त्री.), ज्या (आ. स्त्री.), काश्यपी (ई. स्त्री.), क्षितिः (इ. स्त्री.) एतानि भूमेः चतुर्दश पर्यायपदानि।



**वनवर्गः** - **वृक्षो महीरुहः शाखी विटपी पादपस्तरुः।**

**अनोकहः कुटः सालः पलाशी द्रुर्द्रुमागमाः।।**



**व्याख्यानम्** - वृक्षः (अ. पु.), महीरुहः (अ. पु.), शाखी (न. पु.), विटपी (न. पु.), पादपः (अ. पु.), तरुः (उ.पु), अनोकहः (अ. पु.), कुटः, सालः (अ. पु.), पलाशी (न. पु.), द्रुः (उ. पु.), द्रुमः (अ. पु.), अगमः (अ. पु.) एतानि वृक्षस्य द्वादश पर्यायपदानि।


**कामदेवस्य पञ्च बाणाः** - **पञ्चबाणो नाम कामदेवः।**

**अरविन्दमशोकं च चूतं च नवमालिका।**

**नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः।।**


अरविन्दम्

**व्याख्यानम्** - अरविन्दम्, अशोकम्, चूतम्, नीलोत्पलम्, नवमालिका एते कामदेवस्य पञ्च बाणाः।


अशोकम्


चूतम्


नीलोत्पलम्


नवमालिका

**नवनिधयः - महापद्मश्च पद्मश्च शंखो मकरकच्छपौ।**

**मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव।।**



**व्याख्यानम्** - महापद्मः, पद्मः, शंखः, मकरः, कच्छपः, मुकुन्दः, कुन्दः, नीलः, खर्वः, एते कुबेरस्य नव निधयः।

## पठनप्रवर्तनानि।

❖ अमरकोशपङ्क्तीनाम् आलपनं करोतु।

**श्रद्धेयाः अंशाः।**

- स्पष्टोच्चारणम्।
- उचितस्थाने पदविच्छेदः।
- अर्थावगतिः।

❖ कक्ष्यायां पदकेलीं चालयतु।

**श्रद्धेयाः अंशाः।**

- आसूत्रणम्।
- प्रश्नोत्तराणां निर्धारणम्।
- केलीचालनम्।

❖ अधो दत्तानि पदानि उपयुज्य समानार्थकपदानां पट्टिकां निर्मातु।

भूः, अन्तरिक्षं, धीः, पादपः, सुरलोकः, काश्यपी, गगनम्, नाकः, मनीषा, सालः, द्यौः, धरा, धिषणा, त्रिदिवः, ज्ञप्तिः, खं, क्षोणी, अम्बरम्, वृक्षः, बुद्धिः, धरणी, स्वर्गः, नभः, तरुः, द्रुमः।

| भूमिः | अम्बरम् | वृक्षः | बुद्धिः | स्वर्गः |
|---|---|---|---|---|
| | | | | |
| | | | | |
| | | | | |
| | | | | |

❖ प्रदत्तेभ्यः अक्षरेभ्यः उचितमक्षरं योजयित्वा पदानि लिखतु।

| र, व, क, न्दः, च्छ, लो | | |
|---|---|---|
| अ .... विन्दं, | न .... मालिका, | मुकु ...., |
| म .... रः, | क .... पः, | नी .... त्पलं। |

❖ अमरकोशकारिकां पठित्वा प्रदत्तं पदप्रश्नं पूरयतु।

| | | | | |
|---|---|---|---|---|
| 1 अ | 2 - | न्तं | 3 चे | 6 चू |
| - | भः | | - | |
| ला | 5 - | 7 लः | 4 ना | - |

**दक्षिणतः**

1. आकाशस्य अपरं नाम।
4. स्वर्गः इत्यर्थकं पदम्
5. नवनिधिषु एकः ।

**अधः**

1. भूमिः इत्यर्थकं पदम्।
2. आकाशम् इत्यर्थकं पदम्।
3. बुद्धिः इत्यर्थकं पदम्।
6. पञ्चसु बाणेषु अन्यतमः ।

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्) |
|---|---|---|---|---|---|
| 1. | अमरकोशपङ्क्तीनां पारायणं कृतम्। | | | | |
| 2. | कक्ष्यायां पदकेलिः कृता। | | | | |
| 3. | पट्टिका रचिता। | | | | |
| 4. | पदरचना कृता। | | | | |
| 5. | पदप्रश्नः पूरितः। | | | | |


*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*

# पञ्चमः पाठः
# दानवीरः कर्णः।

*(कर्णः सूर्यात् जातः कुन्तीपुत्रः। स च शैशवावस्थायामेव नद्यां प्रक्षिप्तः। नद्यां प्रवहन्तं शिशुं सूतः अतिरथः गृहीत्वा गृहं नीतवान्। अतः सः सूतपुत्रः इति प्रथां लेभे। कर्णः दानवीरः इति लोके प्रसिद्धः। तस्य एका कथा अत्र प्रतिपाद्यते ।)*

कुन्तीपुत्रः कर्णः कवचकुण्डलैः सह लब्धजन्मा अभवत्। कवचकुण्डलैः युक्तः सः केनापि जेतुं न शक्यते। सूतेन शल्यराजेन सहितः कर्णः युद्धाय सन्नद्धः अभवत्। तदा इन्द्रः ब्राह्मणरूपेण आगत्य महत्तरां भिक्षाम् अयाचत। तदा दानशीलः कर्णः ब्राह्मणं पूजयित्वा तस्मै गोसहस्रं, वाजिनां सहस्रं, प्रभूतं सुवर्णम् इत्यादिकं दातुम् उद्युक्तः अभवत्। किन्तु ब्राह्मणः एतत्किमपि नैच्छत्। तदा कर्णः अवदत् - "यदि भवान् इच्छति तर्हि मम कवचकुण्डलानि ददामि" इति। तदा 'कृपया देहि' इति ब्राह्मणः अवदत्- एतच्छ्रुत्वा कवचकुण्डलानि दातुम् उद्युक्तं कर्णं शल्यराजः तस्मात् प्रतिनिवर्तयितुम् अयतत। किन्तु कर्णः तस्य वाक्यं विगणय्य 'मम एकैव वाक्, अतिथिपूजा



मया कर्तव्या' इत्युक्त्वा कवचकुण्डलानि ब्राह्मणाय अयच्छत्। ब्राह्मणः तानि स्वीकृत्य "तव यशः आचन्द्रतारं तिष्ठतु" इति अनुगृह्य सतोषम् अगच्छत्।

## पदच्छेदः

| | | |
|---|---|---|
| नैच्छत् | - | न + ऐच्छत्। |
| एतच्छ्रुत्वा | - | एतद् + श्रुत्वा। |
| एकैव | - | एका + एव। |
| इत्युक्त्वा | - | इति + उक्त्वा |

## क्रियापदपरिचयः

| | | |
|---|---|---|
| अभवत् | - | भू धातोः परस्मैपदी लङ् प्र. पु. ए. व.। |
| याचे | - | याच् धातोः आत्मनेपदी लट् उ. पु. ए. व.। |
| देहि | - | दा धातु परस्मैपदी लोट् म. पु. ए. व.। |
| अयाचत | - | याच् धातोः आत्मनेपदी लङ् प्र. पु. ए. व.। |
| अदात् | - | डु दाञ् धातोः परस्मैपदी लुङ् प्र. पु. ए. व.। |
| इच्छति | - | इष् धातोः परस्मैपदी लट् प्र. पु. ए. व.। |
| ऐच्छत् | - | इष् धातोः परस्मैपदी लङ् प्र. पु. ए. व.। |
| अवदत् | - | वद् धातोः परस्मैपदी लङ् प्र. पु. ए. व.। |

## पठनप्रवर्तनानि।

❖ पाठं पठित्वा संश्लिष्टपदानि चित्वा लिखतु।

**श्रद्धेयाः अंशाः।**

- सस्वरम् उच्चैः वाचनम्।
- संश्लिष्टपदानां चयनम्।
- विश्लेषणम्।

❖ नूतनपदानाम् अर्थान् शब्दकोशं निरीक्ष्य लिखतु।

**श्रद्धेयाः अंशाः।**

- पाठवाचनम्।
- नूतनपदानां चयनम्।
- कोशं निरीक्ष्य अर्थलेखनम्।

❖ कथां पठित्वा कथास्तम्भान् क्रमीकरोतु।

1. गोसहस्राणि सुवर्णनाणकानि च ब्राह्मणः नैच्छत्।
2. इन्द्रः ब्राह्मणरूपेण आगत्य महत्तरां भिक्षाम् अयाचत।
3. कर्णः स्वरक्षाकवचानि कुण्डलानि च अयच्छत्।
4. ब्राह्मणः कर्णस्य कवचकुण्डलानि अयाचत।
5. कर्णः कवचकुण्डलैः सह लब्धजन्मा अभवत्।

**श्रद्धेयाः अंशाः।**

- कथास्तम्भानां वाचनम्।
- आशयग्रहणम्।
- पौर्वापर्येण क्रमीकरणम्।

❖ अनुबन्धे दत्तानि याच् धातोः लट्, लङ् रूपाणि पठित्वा वन्द् धातो लट्, लङ् रूपाणि लिखतु।

**श्रद्धेयौः अंशाः।**

- वाचनम्।
- आत्मनेपदरूपाणां लेखनम्।

❖ दानस्य महत्वप्रतिपादिकाम् अन्यां कामपि कथां वदतु लिखतु।

**श्रद्धेयाः अंशाः।**

- कथाकथनसामर्थ्यम्।
- पौर्वापर्यक्रमः।
- लेखनसामर्थ्यम्।

❖ "मम एकैव वाक्, अतिथिपूजा मया कर्तव्या" इति वाक्यं पठित्वा कर्णस्य दानशीलस्य महत्वम् अधिकृत्य चर्चां करोतु।

**श्रद्धेयाः अंशाः।**

- वाचनम्।
- आशयावगमः ।
- चर्चायां भागभागित्वम्।

# अनुबन्धः

## शब्दकोशः

| पदम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलम् |
|---|---|---|---|---|
| लब्धजन्मा | जातः | ജനിച്ചവൻ | ಹುಟ್ಟಿದವನು | be born |
| अभवत् | अभूत् | ഭവിച്ചു | ಆಯಿತು | become |
| सूतः | सारथिः | തേരാളി | ಸಾರಥಿ | charioter |
| प्रतिनिवर्तयति स्म | प्रतिन्यवर्तयत् | പിൻതിരിപ്പിച്ചു | ಹಿಂತೆಗೆಸುತ್ತಾನೆ | discouraged |
| विगणय्य | तिरस्कृत्य | അവഗണിച്ചിട്ട് | ಕಡೆಗಣಿಸಿ | having re-jected |
| कर्तव्या | कर्तुं योग्या | ചെയ്യേണ്ടത് | ಕರ್ತವ್ಯ | duty |
| सतोषम् | ससन्तोषम् | സന്തോഷത്തോടെ | ಆನಂದದಿಂದ | with pleasure |
| अदात् | अददात् | നൽകി | ಕೊಟ್ಟನು | gave |
| देहि | प्रयच्छ | തരു | ಕೊಡು | you give |
| अयाचत | याचते स्म | യാചിച്ചു | ಬೇಡಿದನು | begged |
| ऐच्छत् | इच्छति स्म | ആഗ്രഹിച്ചു | ಇಚ್ಛಿಸಿದನು | desired |
| अवदत् | वदति स्म | പറഞ്ഞു | ಹೇಳಿದನು | said |

**धातुरूपाणि -** **'याच्' धातोः (आत्मनेपदि) लट् रूपाणि।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | याचते | याचेते | याचन्ते |
| म. पु. | याचसे | याचेथे | याचध्वे |
| उ. पु. | याचे | याचावहे | याचामहे। |

**'याच्' धातोः लङ् (आत्मनेपदि ) रूपाणि।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | अयाचत | अयाचेताम् | अयाचन्त |
| म. पु. | अयाचथाः | अयाचेथाम् | अयाचध्वम् |
| उ. पु. | अयाचे | अयाचावहि | अयाचामहि। |

### 'इष्' धातोः( परस्मैपदि )लङ् रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | ऐच्छत् | ऐच्छताम् | ऐच्छन् |
| म. पु. | ऐच्छः | ऐच्छतम् | ऐच्छत |
| उ. पु. | ऐच्छम् | ऐच्छाव | ऐच्छाम। |

### 'दा' धातोः लोट् (परस्मैपदि )रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | ददातु ,दत्तात् | दत्तां | ददतु |
| म. पु. | देहि ,दत्तात् | दत्तं | दत्त |
| उ. पु. | ददानि | ददाव | ददाम। |

## शब्दरूपाणि

### आकारान्तः स्त्रीलिङ्गः 'रमा' शब्दः।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | रमा | रमे | रमाः |
| सं. प्र. | हे रमे! | हे रमे! | हे रमाः |
| द्वि. | रमां | रमे | रमाः |
| तृ. | रमया | रमाभ्यां | रमाभिः |
| च. | रमायै | रमाभ्यां | रमाभ्यः |
| प. | रमायाः | रमाभ्यां | रमाभ्यः |
| ष. | रमायाः | रमयोः | रमाणाम् |
| स. | रमायाम् | रमयोः | रमासु। |

## किमधिगतम् ?

❖ पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| 1. | संश्लिष्टपदानां चयनं कृतम्। | | | | |
| 2. | पदार्थलेखनं कृतम्। | | | | |
| 3. | कथास्तम्भाः क्रमीकृताः। | | | | |
| 4. | क्रियापदानां पट्टिकाकरणं कृतम्। | | | | |
| 5. | समानाशयकथा कथिता। | | | | |
| 6. | दानमहत्त्वं अधिकृत्य चर्चा कृता। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*